विषय कोड: ००५

**NEB - GRADE XII**

## अनिवार्य वैकल्पिक संस्कृत रचना

परीक्षार्थिभिः प्रश्नश्योत्तरं यथासंभवं स्वकीयैः शब्दैर्लेखनीयम् । दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ।

**समयः घण्टात्रयम्** **पूर्णाङ्का : १००**

उत्तीर्णाङ्काः ३५ (आंशिकच्छात्राणाङ्कृते)

१. अधोलिखितप्रश्नेषु चतुर्णामेवोत्तराणि लिखतः- ४×५=२०

क) चेतव्यम्, देयम्, चिकित्सा, ग्राही, दन्तुरः एतेषां प्रकृतिप्रत्ययविभागं कुरुत ।

ख) यत्-णिनि-तुमुन्-वत्-तमप्प्रत्ययविधायकानि सूत्राणि लिखत ।

ग) धनिकः,प्राज्ञः,वैदेहः,कुलीनः,गरिमा, एतेषां तद्धितान्तशब्दानां प्रकृतिप्रत्ययविभागं कुरुत ।

घ) क्रमादिभ्यो वुन्, सप्तम्यास्त्रल्, ईषद्समाप्तौ कल्पब्देश्यदेशीयरः, एतेषां सूत्राणामर्थान् विलिख्य एकैकमुदाहरणं दत्त ।

ङ) पच्धातोः ल्युप्रत्यये, गम्धातोः क्तिन्प्रत्यये, जिधातोः अच्प्रत्यये, व्याकरणशब्दात् अण्प्रत्यये, गङ्गाशब्दात् ढक्प्रत्यये कृते निष्पन्नानि रूपाणि लिखत ।

२ अधोनिर्दिष्टेषु चतुर्णामेव प्रश्नानामुत्तराणि लिखतः- ४×५=२०

क) समासं परिचीय तद्भेदान् परिगणयत ।

ख) उपमानपूर्वपद-उपमानोत्तरपदयोः कर्मधारयसमासयोः लक्षणमुदाहरणञ्च लिखत ।

ग) द्विगुद्वन्द्वसमासयोः भिन्नतां सोदाहरणमुट्टङ्कयत ।

घ) सङ्ख्योत्तरपदबहुव्रीहिसमासस्य त्रीणि उदाहरणानि लिखत ।

ङ) नञ्केवलसमासयोर्भेदं सोदाहरणं लिखत ।

३. अधोनिर्दिष्टेषु चतुर्ण्णां प्रश्नानामुत्तराणि लिखतः- ४×५=२०

क) वाक्यं किम् ?सभेदं लिखत ।

ख) अधोलिखितानि पदानि प्रयुज्य एकं जटिलं वाक्यं रचयतः-
अपहृतराज्यः, देवेन्द्रः, विष्णोः, भगवतः, गतवान्, शरणम्, लब्धुं, स्वर्गस्य राज्यं, पुनः ।

**क्रमशः**



(ग) जिजीविषुः क्रीडकः कूर्दनक्षेत्रं प्राप्तवान् । स प्रयासरतः अस्ति । स क्रीडनसामग्रीः नीतवान् । स मित्राण्यनुसृत्य निर्गतः । एतेषां वाक्यानां संश्लेषेण एकं जटिलं वाक्यं लिखत ।

घ) कर्तृकर्मक्रियापदेषु प्रत्येकं विशेषणं संस्थाप्य संस्कृते वाक्यद्वयं रचयत ।

(ङ) दण्डान्वयखण्डान्वययोः सोदाहरणं परिचयं लिखत ।

४. अधोनिर्दिष्टगद्यभागमधिकृत्य तदन्ते पृष्टानां चतुर्णामेव प्रश्नानामुत्तराणि लिखतः- ४×५=२०

तच्छ्रुत्वा निपुणतरं परिज्ञाय सत्वरं सलिलान्निष्क्रम्य पुलकिततनुरानन्दाश्रुपूरितनयनो मन्थरकः प्रोवाच "एह्येहि मित्र आलिङ्ग माम्, चिरकालान्मया त्वं न सम्यक् परिज्ञातः । तेनाहं सलिलान्तः प्रविष्टः"

क) मन्थरकः कं प्रोवाच ?

ख) श्रुत्वा, सत्वरम्, सलिलात्, पुलकिततनुः, चिरकालात्, एतेषां शब्दानां पर्यायान् लिखत ।

ग) आनन्दाश्रुपूरितनयनः,निपुणतरम्, अनयोः ससमासनाम विग्रहं कुरुत ।

घ) परिज्ञाय, आलिङ्ग, माम्, एहि, प्रोवाच, एतेषां प्रकृतिप्रत्ययविभागं कुरुत ।

ङ) अस्मिन् गद्यखण्डे कर्तृपदानि क्रियापदानि च लेख्यानि ।

५. अधोनिर्दिष्टे पद्ये पठित्वा तदन्ते पृष्टानां चतुर्णां प्रश्नानामुत्तराणि लिखत-४×५=२०

महाजनस्य सम्पर्कः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम् ॥१॥
स्वशक्त्या कुर्वतः कर्म न चेत्सिद्धिं प्रयच्छति ।
नोपालम्भः पुमांस्तत्र दैवान्तरितपौरुषः ॥२॥

क) प्रथमपद्यस्य दण्डान्वयं कुरुत ।

ख) द्वितीयपद्यस्य भावार्थं लिखत ।

ग) उन्नतिकारकः,पद्मपत्रस्थितम्, अतिपुष्टाङ्गयुक्तः, महाजनस्य, नोपालम्भः , एतेषां विग्रहं कुरुत ।

घ) सम्पर्कः, तोयम्, प्रयच्छति, कुर्वतः,पुमान्, सिद्धिम्, एतेषां प्रकृतिप्रत्ययविभागं कुरुत ।

ङ) द्वितीयपद्यस्य कर्तृपदानि क्रियापदानि च लिखत ।

**समाप्तम्**